साक्षादेव महादेवस्तज्ज्ञानमिति कीर्त्तितम् ॥”
इति कौर्म्मे उपविभागे १४ अध्यायः ॥

विज्ञानपादः, पुं, ( विज्ञानमेव पादं लक्ष्यं यस्य । ) वेदव्यासः । इति केचित् ॥

विज्ञानमयकोषः, पुं, ( विज्ञानमयस्तदात्मकः कोष इवाच्छादकत्वात् ।) ज्ञानेन्द्रियैः सहिता बुद्धिः । इति वेदान्तसारः ॥

विज्ञानमातृकः, पुं, ( विज्ञानं मातेव यस्य । बहुव्रीहौ कप् । ) बुद्धः । इति हेमचन्द्रः ॥

विज्ञानिकः, त्रि, ( विज्ञानमस्त्यस्येति । विज्ञान + ठन् ।) ज्ञानविशिष्टः । विज्ञः । इति वैज्ञानिकशब्दटीकायां भरतः ॥

विज्ञापनं, क्ली, (वि + ज्ञा + णिच् + ल्युट् ।) बोधनम् । जानान इति भाषा । विपूर्ब्बण्यन्तज्ञाधातोरनट्प्रत्ययेन निष्पन्नम् ॥ ( यथा, कथासरित्सागरे । १९ । ५८ ।
“तया विज्ञापनायाहं प्रेषितः स्वीकुरुष्व ताम्।
युवयोरस्तु योगोऽयं कौमुदीचन्द्रयोरिव ॥”*॥
स्त्री, वि + ज्ञा + णिच् + युच् । टाप् । विज्ञापना । यथा, रघुः । १७ । ४० ।
“ततः परमभिव्यक्तसौमनस्यनिवेदितैः ।
युयोज पाकाभिमुखैर्भृत्यान् विज्ञापनाफलैः ॥”)

विज्ञाप्तिः, स्त्री, ( वि + ज्ञा + णिच् + क्तिन् । ) विज्ञापनम् । विपूर्ब्बण्यन्तज्ञाधातोः क्तिप्रत्ययेन निष्पन्ना ॥ (विकल्पेन ह्रस्वे विज्ञप्तिरपि ॥)

विज्ञेयं, त्रि, ( विज्ञातुं योग्यम् । वि + ज्ञा + “अचो यत् ।” ३ । १ । ९७ । इति यत् । “ईद्यति ।” ६ । ४ । ६५ । इति आत ईत् । ) विज्ञातव्यम् । विज्ञानीयम् । विपूर्ब्बज्ञाधातोर्यप्रत्ययेन निष्पन्नम् ॥ ( यथा, मनुः । २ । १० ।
“श्रुतिस्तु वेदो विज्ञेयो धर्म्मशास्त्रन्तु वै
स्मृतिः ।” )

विञ्जामरं, क्ली, चक्षुःशुक्लचेतम । इति केचित् ॥

विञ्जोली, स्त्री, पङ्क्तिः । इति त्रिकाण्डशेषः ॥

विट, आक्रोशे । स्वने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-स्वने अक०-सेट् । ) वेटति । आक्रोशः । केचिन्न पठ्यते । स्वनः शब्दः । इति दुर्गादासः ॥

विटः, पुं, ( वेटतीति । विट + कः । ) षिड्गः । इत्यमरः ॥ ( यथा, भागवते । १० । १३ । २ ।
“सतामयं सारभृतां निसर्गो
यदर्थवाणीश्रुतिचेतसामपि ।
प्रतिक्षणं नव्यवदच्युतस्य यत्
स्त्रिया विटानामिव साधु वार्त्ता ॥”)
कामुकानुचरः । धूर्त्तः । इति भरतः ॥ कामतन्त्रकलाकोविदः । इति रसमञ्जरी ॥ पर्व्वतविशेषः । लवणभेदः । खदिरविशेषः । मूषिकः । इति मेदिनी । टे, २८ ॥ नारङ्गवृक्षः । इति शब्दमाला ॥

विटङ्कः, पुं क्ली, ( विशेषेण टङ्क्यते सौधादिषु इति । वि + टङ्क बन्धने + घञ् । ) कपोतपालिका । पायवार खोप इति भाषा । इत्यमरः ॥ हि सौधादिषु प्रान्ते काष्ठादिरचिते गृहपक्षिस्थाने । कपोतान् पालयतीति कपोतपाली ढात् षण् इति षण् स्वार्थे कः कपोत इत्युपलक्षणं पक्षिमात्रपालिकेति बोध्यम् । वीन् पक्षिणष्टङ्कयति बध्नाति विटङ्कं टकि क बन्धे षण् विशेषेण टङ्कयत्यत्रेति वा अल् घञ् वा । इति भरतः ॥ ( यथा, माघे । ३ । ५५ ।
“रतान्तरे यत्र गृहान्तरेषु
वितर्द्दिनिर्यूहविटङ्कनीड़ः ।
रुतानि शृण्वन् वयसां गणोऽन्तेवासित्वमाप स्फुटमङ्गनानाम् ॥”*॥
सुन्दरे, त्रि । यथा, भागवते । ३ । १५ । २७ ।
“देवावचक्षत गृहीतगदौ परार्द्ध्य-
केयूरकुण्डलकिरीटविटङ्कवेशौ ॥”)

विटङ्ककः, पुं क्ली, ( विटङ्क एव । स्वार्थे कन् । ) विटङ्कः । इति शब्दरत्नावली ॥

विटपः, पुं क्ली, ( वेटति शब्दायते इति । विट + “विटपपिष्टपविशिपोलपाः ।” उणा० ३।१४५ । इति कप्रत्ययेन निपातनात् साधुः । ) शाखापल्लवसमुदायः । तत्पर्य्यायः । विस्तारः २ । इत्यमरः ॥ स्तम्बः ३ । इति मेदिनी । पे, २२ ॥ शाखा । ( यथा, रघुः । १० । ११ ।
“बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः ।
आविर्भूतमपां मध्ये पारिजातमिवापरम् ॥”)
पल्लवः । इति शब्दरत्नावली ॥ ( यथा, ऋतुसंहारे । १ । २४ ।
“तरुविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ॥”)
क्ली, मुष्कवङ्क्षणान्तरम् । यथा,—
“विटपन्तु मढ़ावीण्यमन्तरामुष्कवङ्क्षणम् ॥”
इति हेमचन्द्रः ॥
( यथा, सुश्रुते । ३ । ६ ।
“वङ्क्षणवृषणयोरन्तरे विटपं नाम तत्र षाण्ढ्यमल्पशुक्रता वा भवति ॥”)

विटपः, पुं, (विटान् पातीति । पा + कः ।) विटाधिपः । पारदारिकश्रेष्ठः । इति मेदिनी । पे, २२ ॥ आदित्यपत्रः । इति राजनिर्घण्टः ॥

विटपी, [ न् ] पुं, ( विटपः शाखादिरस्यस्येति । विटप + इनिः । ) वृक्षः । इत्यमरः ॥ ( यथा, आर्य्यासप्तशत्याम् । ४८६ ।
“यूथपते तव कश्चिन्नहि मानस्यानुरूप इह
विटपी ।
प्रेरय दिनं निदाघद्राघीयः क्व खलु ते छाया ॥”)
वटः । इति राजनिर्घण्टः ॥ ( विटपयुक्ते, त्रि । यथा, महाभारते । १ । ४३ । १० ।
“अङ्कुरं कृतवांस्तत्र ततः पर्णद्वयान्वितम् ।
पलाशिनं शाखिनञ्च तथा विटपिनं पुनः ॥”)

विटप्रियः, पुं, ( विटानां प्रियः । ) मुद्गरवृक्षः । इति राजनिर्घण्टः ॥

विटमाक्षिकः, पुं, ( विटप्रियो माक्षिकः । ) धातुविशेषः । तत्पर्य्यायः । ताप्यः २ नदीजः ३ कामारिः ४ ताराारिः ५ । इति हेमचन्द्रः ॥

विटलवणं, क्ली, ( विटसंज्ञकं लवणम् । ) विड्लवणम् । इति केचित् ॥

विटिः, स्त्री, ( विटतीति । विट् + इन् । स च कित् । ) पीतचन्दनम् । इति शब्दमाला ॥

विट्, [ श् ] पुं, ( विश् + क्विप् । ) वैश्यः । (यथा, मनुः । २ । ३६ ।
“गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः ॥”)
मनुजः । इत्यमरः ॥ ( यथा, रघुः । १ । ९३ ।
“अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।
सूनुः सूनृतवाक् स्रष्टुः विससर्जोर्जितश्रियम् ॥”)
प्रवेशः । इति विश्वः ॥

विट्, [ ष् ] स्त्री, ( विष व्याप्तौ + क्विप् । ) विष्ठा । इत्यमरः ॥ कन्या । इति विट्पतिशब्ददर्शनात् ॥ ( व्याप्ते, त्रि । यथा, ऋग्वेदे । ८ । १९ । ११ ।
“हव्या वा वेविषद्विषः ।”
“विषः व्याप्तान् देवान् वेविषत् प्रापयेत् ।” इति तद्भाष्ये सायणः ॥)

विट्कारिका, स्त्री, पक्षिविशेषः । तत्पर्य्यायः । कृकणी २ गोराटी ३ गोकिराटिका ४ । इति भूरिप्रयोगः ॥ विट्मारिका ५ । इति हारावली ॥

विट्खदिरः, पुं, ( विड्वत् दुर्गन्धः खदिरः । ) विष्ठावद्गन्धखदिरः । गुयेबावला इति भाषा ॥ तत्पर्य्यायः । अरिमेदः २ । इत्यमरः ॥ इरिमेदः ३ असिमेदः ४ । इति शब्दरत्नावली ॥ इरिमेदः ५ कालस्कन्धः ६ अरिमेदकः ७ । अस्य गुणाः । कषायत्वम् । उष्णत्वम् । मुखदन्तगदास्रकण्डूविषश्लेष्मक्रिमिकुष्ठव्रणग्रहनाशित्वञ्च । इति भावप्रकाशः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ अरिमेदशब्दे द्रष्टव्यौ ॥

विट्चरः, पुं, ( विषि विष्ठायां चरतीति । चर + टः । ) ग्राम्यशूकरः । इत्यमरः ॥

विट्पतिः, पुं, (विषः कन्यायाः पतिः ।) जामाता । इति जटाधरः ॥ ( यथा, मनुः । ३ । १४८ ।
“मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम् ।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् ॥” * ॥
वैश्यानां पतिः । यथा, भागवते । ४।२३ । ३२ ।
“वैश्यः पठन् विट्पतिः स्यात् शूद्रः सत्तमतामियात् ॥”
“विशां पश्वादीनां वैश्यादीनां वा पतिः स्यात् ।” इति तट्टीका ॥ )

विट्सारिका, स्त्री, (विट्प्रिया सारिका ।) पक्षिविशेषः । इति जटाधरः ॥ गुये सालिक् इति भाषा ॥

विठरः, पुं, वाग्मी । इति संक्षिप्तसारोणादिवृत्तिः ॥

विड, आक्रोशे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) वेडति शत्रुं बली । इति दुर्गादासः ॥